CCE-II-RR/PR/PF/NSR/NSPR(A)/888/4016

**A**

**ಜೂನ್ 2024 ರ ಪರೀಕ್ಷೆ - 2**

**JUNE 2024 EXAMINATION - 2**

ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]
Total No. of Printed Pages : 12 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 38 ]
Total No. of Questions : 38 ]

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 67-S**
**Code No. : 67-S**

**CCE RR/PR/PF/ NSR/NSPR**
**FULL SYLLABUS**

Question Paper Serial No.

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ

# Subject : Third Language — SANSKRIT

# तृतीयभाषा — संस्कृतम्

**(ಶಾಲಾ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / ಎನ್.ಎಸ್.ಆರ್. / ಎನ್.ಎಸ್.ಪಿ.ಆರ್.)**

**(Regular Repeater / Private Repeater / Private Fresh / NSR / NSPR)**

15. 06. 2024

ದಿನಾಂಕ : 15. 06. 2024 ] [ Date : 15. 06. 2024

ಸಮಯ : ಬೆಳಗ್ಗೆ 10-15 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-15 ರವರೆಗೆ ] [ Time : 10-15 A.M. to 1-15 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 80 ] [ Max. Marks : 80

**Cut here/ಇಲ್ಲಿ ಕತ್ತರಿಸಿ**

**TEAR HERE TO OPEN THE QUESTION PAPER**
**प्रश्नपत्रमुद्घाटयितुमित: कर्तयत**

इत: कर्तयत

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 38 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ***ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ (ಬಾಣವನ್ನು ಅನುಸರಿಸಿ), ಎಡಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಬೇಡಿ.*** ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.
6. ನಿಮಗೆ ವಿತರಿಸಲಾಗಿರುವ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಆವೃತ್ತಿ ( Version ) ಮತ್ತು ನಿಮ್ಮ ಪ್ರವೇಶ ಪತ್ರದಲ್ಲಿ ಮುದ್ರಿತವಾಗಿರುವ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಆವೃತ್ತಿ ಒಂದೇ ಆಗಿರುವುದನ್ನು ಖಾತರಿಪಡಿಸಿಕೊಳ್ಳಿ.

***परीक्षार्थिनां सामान्यसूचनाः***

1. अस्मिन् प्रश्नपत्रे अष्टत्रिंशत् (38) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । **परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन** कर्तयत **(तीर निशानं अनुसराणि) । प्रश्नपत्रमुद्घाटयितुं वामपार्श्वेन मा कर्तयत ।** प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।
6. भवद्भ्यः प्रदत्ता प्रश्नपत्रस्य आवृत्तिः ( Version ) तथा भवतां प्रवेशपत्रे मुद्रित–प्रश्नपत्रस्य आवृत्तिः च समाना वा इति पर्यवलोकयत ।



Tear here

**I. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत ।** **8 × 1 = 8**

1. 'शैलः' अस्य समानार्थकपदम् इदं भवति ।

   (A) अरिः (B) शौरिः

   (C) गिरिः (D) मुरारिः

2. 'कृतघ्नः' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) अल्पज्ञः (B) कृतज्ञः

   (C) कृतार्थः (D) सुकृतम्

3. 'ग्रन्थालयः' अत्र एषः लिङ्गः भवति ।

   (A) स्त्रीलिङ्गः (B) नपुंसकलिङ्गः

   (C) अन्यलिङ्गः (D) पुंलिङ्गः

4. 'गच्छ' अत्र एषः लकारः भवति ।

   (A) लोट् लकारः (B) लट् लकारः

   (C) लृट् लकारः (D) लिट् लकारः

5. 'प्रेषयति' अत्र एषः पुरुषः वर्तते ।

(A) प्रथमपुरुषः (B) मध्यमपुरुषः

(C) उत्तमपुरुषः (D) महापुरुषः

6. ''गुणः अस्य अस्ति इति ।'' अत्र तद्धितान्तपदम् एवं भवति ।

(A) धनवान् (B) रूपवान्

(C) बलवान् (D) गुणवान्

7. ''सा पत्रं लेखन्या लिखति'' । अत्र रेखाङ्कितपदस्य कारकम् इदं भवति ।

(A) कर्मकारकम् (B) करणकारकम्

(C) अपादानकारकम् (D) अधिकरणकारकम्

8. ''रजनी विज्ञानं ज्ञातुम् इच्छति'' । अत्र कृदन्तपदम् इदं भवति ।

(A) रजनी (B) विज्ञानं

(C) ज्ञातुम् (D) इच्छति

**II. चतुर्थं पदं लिखत ।** **4 × 1 = 4**

9. दशकण्ठः – रावणः :: दाशरथिः – .................... ।

10. जलस्थानगतं जलं – शुष्यति :: कालपर्ययात् शिक्षा – .................... ।

11. श्रीकृष्णः – गीताचार्यः :: पार्थः – .................... ।

12. निशामणिः – चन्द्रः :: सर्वदा – .................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **4 × 1 = 4**

13. मेलुकोटे कस्मिन् मण्डले अस्ति ?

14. केषां मध्ये भीषणं युद्धं प्रचलति स्म ?

15. तनुवाग्विभवः कः ?

16. का अस्मान् बध्नाति ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

17. ग्रन्थालयस्य ग्रन्थपालः किम् अचिन्तयत् ?

18. मेलुकोटे क्षेत्रस्य नामान्तराणि कानि ?

19. कीदृशः महाबलः वः पातु ?

20. कति विधाः जनाः देवं भजन्ते ? ते च के ?

**अथवा**

अस्माकं पूज्यः शैलः कः ? पुण्यनदी च का ?

**V. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

21. ಪಕ್ಷಿಗಳು ಗೂಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತವೆ. ಅವು ಆಕಾಶದಲ್ಲಿ ಹಾರುತ್ತವೆ.

Birds live in nest. They fly in the sky.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

22. कृषकाः ग्रामे निवसन्ति । ते क्षेत्रेषु श्रमेण कार्यं कुर्वन्ति ।

**VII.** 23. **विग्रहवाक्यं लिखत।** **1 × 2 = 2**

a) प्रतिदिनम् ।

b) चन्द्रशेखरः ।

**अथवा**

**समस्तपदं लिखत।**

a) महत् बलं यस्य सः = ...................

b) वृक्षस्य समीपम् = ...................

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत।** **1 × 2 = 2**

24. सर्वदो माधवः पायात् ।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत।** **2 × 3 = 6**

25. ''मया एतानि सर्वाणि पुस्तकानि पठितानि'' ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

26. ''सागर इव तिष्ठतु ते यशः'' ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

**X.** 27. **सन्धिं विभज्य नाम लिखत ।** **1 × 3 = 3**

a) बालस्तत्र

b) राजेन्दुः

c) वदनाम्बुजे ।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

28. मनसि वचसि काये पुण्यपीयूषपूर्णाः ।

**XII. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **1 × 3 = 3**

29. भोजराजः ।

**अथवा**

महर्षिः वेदव्यासः ।

**XIII. पद्यपाठस्य नाम विलिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3 × 3 = 9**

30. पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।

तदहं भक्त्युपहृतम् अश्नामि प्रयतात्मनः ।।

31. शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।

वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।।

32. भारतवासिषु बाह्ये भेदे

बहुत्र बहुधा दृष्टेऽपि ।

आन्तरङ्गिकी संस्कृतिरेका

सनातनी नो बध्नाति ।।

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** **1 × 3 = 3**

33. आरम्भगुर्वी ..........................................................................

.......................................................................................... ।

..........................................................................................

.................................................................... खलसज्जनानाम् ।।

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत ।**

**2 × 4 = 8**

34. ''विक्रमः वेतालश्च'' इति कथां सङ्गृह्य लिखत ।

**अथवा**

भारतस्य आदर्शनारी 'उभयभारती' इति विषयं सङ्गृह्य लिखत ।

35. संस्कृतग्रामस्य वैशिष्ट्यं वर्णयत ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

36. भारतम् अस्माकं देशः । अत्र हैन्दवाः, इस्लां मतावलम्बिनः, क्रैस्तमतानुयायिनः, जैनाः, बौद्धाः च निवसन्ति । देशे सर्वेषां बहूनि पुण्यक्षेत्राणि पवित्रतीर्थानि च शोभन्ते । प्रतिवर्षं भक्ताः एतेषां क्षेत्राणां प्रवासं गत्वा धार्मिकं तृप्तिं लभन्ते । अस्माकं देशे बहुकालादपि विविधधर्मीयाणां मध्ये धार्मिकसहिष्णुता दृढा अस्ति ।

भारतदेशस्य संस्कृतिः सनातनी । ईदृशपरम्परायाः निर्माणार्थं अस्माकं पूर्वजाः प्रशंसार्हाः सन्ति ।

**प्रश्नाः**

i) अस्माकं देशः कः ?

ii) अत्र के के निवसन्ति ?

iii) अस्माकं देशे केषां मध्ये धार्मिकसहिष्णुता दृढा अस्ति ?

iv) भारतदेशस्य संस्कृतिः कीदृशी ?

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 4 = 4**

37. गणेशोत्सवः ।

**अथवा**

परिसरसंरक्षणम् ।

**XVIII. पत्रं लिखत ।** **1 × 5 = 5**

38. मैसूरुमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा प्रवासार्थं धनं प्रेषयितुं पितरं प्रति पत्रं लिखत ।

**अथवा**

हासनमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा दिनद्वयस्य विरामं सम्प्रार्थ्य वर्गशिक्षकं प्रति पत्रं लिखत ।

DO NOT WRITE ANYTHING HERE